देथ॥ यत्सुखी भवां रेणु तत्सुखी वयमपि॥ यद्दुःखी भवां रेणु तद्दुःखी वयमपि॥ अयं भो रेणु राजा दिशांपति जीर्णो वृद्धो महल्लको अध्वगतो वयमनुप्राप्तो
दुर्ज्ञेयं खलु पुनस्तं भो रेणु यमिदं जीवितं मरणान्तं सचे खु भो रेणु राज्ञो दिशांपतेरत्ययेन राजकर्तारो भवन्तं रेणुं राज्येनाभिषिंचिष्यन्ति शक्ष्यासि भवां रे
णु अस्माकमपि राज्येन संविभाजितुं॥ एवमुक्ते भवां रेणुकुमारो षट् क्षत्रियानेतदवोचत्॥ सचे त्वा भवन्तो राज्ञो मा दिशांपतेरत्ययेन कर्तारो राज्येनाभि
षिंचिष्यन्ति संविभजिष्यामहं॥ भवन्तो राज्येन अर्थश्चिद्धाति अस्माकं राज्ये अन्योन्याप्येवं सुखं स्ले धिष्यन्ति॥ अन्यत्रैव भवद्भिः॥ अथ खलु भवन्तो राजाक
र्तारो येन राजा रेणुकुमारस्तेनोपसंक्रमित्वा रेणुकुमारमेतदवोच॥ राज्ये सि कुमार आम्नो राज्येन त्वमभिषिंचाम॥ एवमुक्ते रेणुकुमारो ता राजकर्तारमेत
दवोच॥ तेन हि भवन्तो सुखी भवथ॥ यस्येदानि कालं मन्यथ॥ अथ खलु स रेणु राजा राज्येनाभिषिक्तो पंचहि कामगुणेहि समर्पितो समंगीभूतः क्रीडति र
मति परिचारयति॥ अथ खलु भवन्तो महागोविन्दो ब्राह्मणो येन ते षट् क्षत्रियानेतदवोचत्॥ एतु भवन्तो अयं हि भवन्तो रेणु राजा राज्येनाभिषिक्तो पंच
हि कामगुणेहि समर्पितो समंगीभूतो क्रीडति रमति परिचारयति कामान्वराम॥ एते भवन्तो मेदनीया एतु भवन्तो येन रेणु राजा तेनोपसंक्रमित्वा रेणु
राजानमेवं वदेथ स्मरति भवां रेणु तं वचनं॥ साधु भवन्तो ति एते षट् क्षत्रिया महागोविन्दस्य ब्राह्मणस्य प्रतिश्रुत्वा येन रेणु राजा तेनोपसंक्रमित्वा रेणु रा
जानमेतदवोचन्॥ स्मरति भवां रेणु तं वचनं॥ एवमुक्ते भवन्तो रेणु राजा ताष् षट् क्षत्रियानेतदवोच॥ स्मरामहं भवन्तो तं वचनं॥ अथ क्व चिरं हि इदानि सा मा म
हापृथिवी संप्रथा भाजयिष्यति॥ एवमुक्ते भवन्तो षट् क्षत्रिया रेणु राजानमेतदवोच॥ अथ क्व चिरं हि इदानि भो रेणु तेन भवता महागोविन्देन अन्योपरि

तेनस्यभगवतोर्हतः सम्यक्संबुद्धस्य पुनरेवाष्टावाश्चर्याद्भुता अर्मा भप्रुदाहरे॥ खलुशक्रोदेवानामिन्द्रोभगवतः पुनरेवाष्टाश्चर्याद्भुतांधर्मा॥ यदाखलुपुनर्मार्षा
वानर्हन्सम्यक्संबुद्धोलोके उत्पन्नः हायन्ति आसुराकाया दिव्याकायाअभिवर्द्धन्ति॥ एवंबहुजनहितायप्रतिपन्नो एवंबहुजनसुखायप्रतिपन्नं पुनमार्षा शास्तारंलो
केउत्पन्नं नैवातीतं समनुपश्यामि॥ नाप्येतरहिं नप्रत्युत्पन्नं अन्यत्रैतेनभगवता अर्हता सम्यक्संबुद्धेन एवंपेयालं यावत्संस्यते॥ खलुपुनर्मार्षा तस्यभगवतः सम्यक्सं
बुद्धस्यनिर्वाणं च निर्वाणगामिनी च प्रतिपदा॥ यथापिनाम मार्षा गंगोदकं च संस्यन्दमाने संस्यन्दति॥ महासमुद्रे एवमेव मार्षा तस्यभगवतोऽर्हता सम्यक्संबुद्धस्य
संस्यन्दति निर्वाणं च निर्वाणगामिनी च प्रतिपदा॥ एवंसुदेशितसुप्रज्ञप्तं निर्वाणधर्मदेशना प्रतिपन्नं च पुनर्मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामि
॥ नाप्येतरहिं प्रत्युत्पन्नं अन्यत्रैव तेनभगवताऽर्हता सम्यक्संबुद्धेन॥ एवमुक्ते त्रयस्त्रिंशाद्देवा भूयस्यामात्रया चित्ता अभूवन्॥ आत्तमनाः प्रमुदिताः प्रीतिसौमनस्यजाताः॥
अथखलुभगवन्महाब्रह्मालस्त्रयस्त्रिंशादेवा भूयस्यामात्रया चित्ता आत्तमनाः प्रीतिसौमनस्यजाताः विदित्वा शक्रो देवानामिन्द्र मेतद्वोचत्॥ तेनहिमार्षकौशिक श्रुणुते
मेतस्यभगवतोऽर्हन्तः सम्यक्संबुद्धस्य पुनरेवाष्टाश्चर्याद्भुताधर्मा॥ अथोदाहरे खलुशक्रो देवानामिन्द्रो भवतो पुनः एवाष्टावाश्चर्याद्भुताधर्मा॥ यदाखलुपुनर्मार्षा सभ
गवांस्तथागतोऽर्हन्सम्यक्संबुद्धो लोके उत्पन्नो हायन्ति आसुराकाया दिव्याः काया अभिवर्द्धन्ति॥ एवंबहुजनहितायसुखायप्रतिपन्नः एवंबहुजनहितं बहुजनसुखाय
प्रतिपन्नं च मार्षा शास्तारंलोके उत्पन्नं नैवातीतं समनुपश्यामि नाप्येतरहिं प्रत्युत्पन्नं॥ अन्यत्रैव तेनतथागतेनार्हता सम्यक्संबुद्धेन एवंपेयालं यावत्संस्यन्दति॥ ख
लुपुनर्मार्षा तस्यभगवतोऽर्हन्तः सम्यक्संबुद्धस्य निर्वाणं च निर्वाणगामिनी च प्रतिपदा संयथापिनाम मार्षा गंगोदकं च जमुनोदकं च जमुनोदकं च संस्यन्दमानं सं
स्यन्दयति सहासमुद्रे॥ एवमेवमार्षस्य तस्यभगवतोर्हतः सम्यक्संबुद्धस्य संस्यन्दति निर्वाणगामिनी च प्रतिपदा॥ एवंसुदेशितासुप्रज्ञप्ता निर्वाणधर्मदेशना

प्रतिपदाप्रतिपन्नंपुनर्मार्षशास्तारंलोकेउत्पन्नंनैवातीतंसमनुपश्यामःनाप्यतरहिंप्रत्युत्पन्नं ॥ अन्यत्रैवतेनभगवतार्हतासंम्यक्तबुद्धेन ॥ एवमुक्तेत्रयस्त्रिंशादे
बभूयथामात्रयाचित्ताआत्मनाःप्रीतिसौमनस्यजाताअभूत्सुः ॥ अथभगवन्महाब्राह्मणस्त्रयस्त्रिंशादेवाभूयस्यामात्रयाचित्ताआत्तमनाप्रमुदिताप्रीतिसौमनस्य
जाताविदित्वागाथाभिअध्यभाषि ॥ मोदन्तिभोपुनर्देवाःत्रयस्त्रिंशासशक्रकाः ॥ तथायतनमस्यन्तिधर्मस्यसुखधर्मता ॥ अनन्ताश्चदेवाप्रमुदिताप्रीतिसौमनस्यजा
ताः ॥ अथखलुभगवन्महाब्राह्मणास्त्रयस्त्रिंशादेवाभूयस्यामात्रयाचित्ताप्रमुदिताप्रीतिसौमनस्यजाताविदित्वामन्त्रयन्ति ॥ सचेद्धियूयंमार्षाहस्तस्यभगवतोऽर्हतस्य
क्तबुद्धस्यदीर्घरात्रंमहाप्रज्ञप्रअनुदाहरे ॥ खनुमहाब्रह्माभगवतोदीर्घरात्रंमहाप्रज्ञाप्राभृतपूर्वेभगवतोऽतीतमध्वानराजाविशांपतिर्नामअभूषि ॥ राज्ञःखलुपु
नर्भवन्तोविशांपतिस्यगोविन्दोनामब्राह्मणोअभूषि ॥ पुरोहितोराजाचार्योपण्डितोनिपुणोमेधावीतेषुअर्थेषुराज्ञोखलुपुनर्भवन्तोविशांपतेपुत्रोरेणुर्नामाअभूषि
प्रियोमनापोपण्डितोनिपुणोमेधावीतेषुतेष्वर्थेषुगोविन्दस्यखलुपुनर्भवन्तोब्राह्मणस्यज्योतिपालोनाममाणवकोअभूषि ॥ एकपुत्रकःप्रियोमनापोपण्डितोनिपुणो
मेधावीतेषुतेष्वर्थेषु ॥ अथखलुपुनर्भगवन्तोदीर्घस्याध्वनात्ययेनगोविन्दोनामब्राह्मणःकालमकार्षित ॥ अथखलुपुनर्भवन्तोराजाविर्गोविन्देब्राह्मणेकालगतेशोच
तिक्लाम्यतिपरिदेवतिउरस्ताडंक्रन्दतिसंमोहमापद्यति ॥ हंभोयस्मिंदानिवयंसमयेगोविन्दस्यअर्थायोनिसम्येभिर्घातयित्वायत्रहिकामगुणेहिसमर्पितासमङ्गीभू
ताक्रीडामरमामपरिचारेम ॥ तस्मिन्समयेगोविन्दोब्राह्मणोकालगतोति ॥ अश्रोषीत्खलुभवन्तोरेणुकुमारोराजाकिलविशांपतिर्गोविन्दोब्राह्मणोकालगतेशोचति
क्लाम्यतिपरिदेवतिउरस्ताडंक्रन्दतिसंमोहमापद्यन्ति ॥ हंभोतस्मिंदानिसमयेगोविन्दोब्राह्मणोकालगतोति ॥ अथखलुभवन्तोरेणुकुमारोयेनराजादिशांपति
स्तेनोपसंक्रमित्वाराजानंदिशांपतिमेतदवोचत ॥ मामहाराजशोचमाक्लाम्यमापरिदेवमाउरस्ताडंक्रन्दमासंमोहमापद्य ॥ तत्कस्यहेतोः ॥ अस्तिमहाराजगोविन्द

हायेन्तुरसुराकायाः दिव्याकायाअभिवर्द्धयेन्तु ॥ एवमुक्ते त्रयत्रिंशादेवातुष्टाअभून्तुः आत्मनाः प्रमुदिताः प्रीतिसौमनस्यजाताः अथखलुभगवा

नामिन्द्रोत्रायस्त्रिंशानांवदेवानुष्टाचित्ताआत्तमनाप्रमुदितांप्रीतिसौमनस्यजाताविदित्वाआमंत्रयति ॥ सविद्धियूयंमारिषस्यभगवतोर्हन्तःसंम्यक्सं

अष्टावाश्चर्याद्भुताधर्मंशृणोथ ॥ अर्व्वाद्ययूयंपिभवथभूयस्यामात्रयातुष्टचित्ताआत्तमनाप्रीतिसौमनस्यजाता ॥ एवमुक्तेभगवन्त्रायत्रिंशाश्चदेवाःशक्रंदेवा

नामिन्द्रमेतदवोचन् ॥ तेनहिमारिषकौशिकप्रतिभातुतेतस्यभगवतोअर्हन्तःसंम्यक्संबुद्धस्याष्टमाश्चर्याद्भुताधर्ममुदाहरे ॥ अथखलुशक्रोदेवानामिन्द्रोभगव

तोअष्टमाश्चर्याद्भुताधर्म्मभाषा ॥ यदाखलुमारिषभगवानर्हन्सम्यक्संबुद्धोलोकेउत्पन्नोहायन्तिआसुराकायाः दिव्याकायाअभिवर्द्धन्ति ॥ एवंबहुजनहितायप्र

तिपन्नःपुनर्मारिषशास्तारंलोकेउत्पन्नंनैवातीतंनवासमनुपश्याम ॥ नेतरहिंनप्रत्युत्पन्ने ॥ अन्यत्रैवभगवताअर्हतासम्यक्संबुद्धेनस्वाख्यातोखलुपुनर्मारिषत

स्यतथागतस्यार्हतःसम्यक्संबुद्धस्यधर्मविनयसांदृष्टिकआकालिकोएहिपश्यिकः औपनयिकप्रत्यात्मवेदयितव्योविज्ञैः यदिदंमदनिर्मदनंपिपासाप्रतिवि

नयोआलयसमुद्घातोधर्मोपच्छेदस्तृष्णाक्षयोविरागोनिरोधोनिर्वाणः एवंस्वाख्यातंधर्मविनयंपुनर्मारिषशास्तारंलोकेउत्पन्नंनैवातीतंसमनुपश्यामिनेतर

हिंनप्रत्युत्पन्ने ॥ अन्यत्रैवतेनैवभगवतामहतासम्यक्संबुद्धेननाभीखलुपुनर्मारिषसभगवांअर्हन्सम्यक्संबुद्धोभावकाराणांशैक्षाणांप्रतिपदांअर्हतांचआकीर्ण

धर्माणान्तेषामपिचसभगवानर्हन्सम्यक्संबुद्धोप्रत्यनुभवत्यआरण्यकानिशय्यासनाध्यावसति ॥ प्रान्तानिविविक्तानिगतजनपदानिमनुष्यरहेशय्याकानि

प्रतिसंलयनसारोप्यानिगकोगणाव्यपकृष्टोएकोएकानानामोएकानामनामनामनुप्रयुक्तो ॥ एकेकानामनामनुयुक्तोचपुनःमार्षाशास्तारंलोकेउत्पन्नंनैवातीत

समनुपश्याम नैतरहिं भवन्तमुत्पन्नं॥ अन्यत्रैव तेन भगवता सम्यक्संबुद्धेन॥ लाभी खलु पुनर्मार्षा स भगवानर्हं सम्यक्संबुद्धो प्रणीतानां खादनीयभोजनीयानां कवुरसानां तेषामपि प्रत्ययरसानां तेषामपि च भगवानर्हं सम्यक्संबुद्धो आहारमाहरेति॥ अनवध्यवसितो अनविमूर्छितो मादीनवदर्शावी निःसरणप्रज्ञैः कामेषु विगतमदो आहारमाहरति॥ एवं विगतमदं आहारमाहरन्तं च पुनर्मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्याम॥ नैतरहिं प्रत्युत्पन्नं अन्यत्रैव तेन भगवतार्हता सम्यक्संबुद्धेन॥ अभिज्ञाय खलु पुनर्मार्षा स भगवानर्हं सम्यक्संबुद्धो श्रावकानां धर्मं देशयति नानभिज्ञाय एवमभिज्ञाय धर्मदेशनाप्रतिपदासंपन्नं च पुनर्मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामो नैतरहिं प्रत्युत्पन्नं॥ अन्यत्रैव भगवतार्हता सम्यक्संबुद्धेन॥ तीर्णविचिकित्सा खलु पुनः मार्षा स भगवानर्हं सम्यक्संबुद्धो विगतकथंकथो॥ वैशारद्यप्राप्तः कृतार्थो धर्मेषु एवं तीर्णविचिकित्सं च पुनर्मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामो नाप्येतरहिं प्रत्युत्पन्नं अन्यत्रैव तेन भगवता तथागतेनार्हता सम्यक्संबुद्धेन॥ यथाकारी तथावादी सो पुनर्मार्षा स भगवानर्हं सम्यक्संबुद्धो तथाकारी यथावादी धर्मानुधर्मप्रतिपन्नः एवं पुनर्मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामः नाप्येतरहिं प्रत्युत्पन्नं॥ अन्यत्रैव तेन भगवता तथागतेनार्हता सम्यक्संबुद्धेन संस्यन्दयति॥ खलु पुनर्मार्षा तस्य भगवतोऽर्हतो सम्यक्संबुद्धस्य निर्वाणं निर्वाणगामिनी च प्रतिपदा॥ सयथापि नाम मार्षा गंगोदकं च यमुनोदकेन संस्यन्दमानं संस्यन्दति॥ महासमुद्रे एवमेव मार्षा तस्य भगवतः सम्यक्संबुद्धस्य संस्यन्दति निर्वाणं च निर्वाणगामिनी च प्रतिपदा॥ एवं सुदेशिता सुप्रज्ञप्ता निर्वाणं निर्वाणगामिनी च प्रतिपदासंपन्नं च पुनर्मार्षा शास्तारं लोके उत्पन्नं नैवातीतं समनुपश्यामः नाप्येतरहिं प्रत्युत्पन्नमन्यत्रैव तेन भगवता तथागतेनार्हता सम्यक्संबुद्धेन॥ एवमुक्ते भगवन्ते यस्त्रायस्त्रिंशो देव भूयस्या मात्रया तुष्टा उदग्रा आत्तमना प्रमुदिता प्रीतिसौमनस्यजाताः शक्रं देवानामिन्द्रमामन्त्रयन्ति॥ तेन हि मार्षा कौशिक पुनरेवं प्रतिभातु

दत्तोनामकाशिराजाअभूषि॥नान्याभिक्षवोतदागंगपालोनामनापितोऋषिप्रव्रजितोभूदेशउपालितदापिएतस्यहीनजात्यस्यममआगम्यसराजिकाय [illegible]
पादायवन्दिताएतरहिंपिएतस्यहीनजात्यस्यसमागसराजिकायपरिषायपादावन्दिता॥ इतिश्रीमहावस्तुअवदानेउपालिगङ्गपालानांजातकंसमाप्त
भिक्षुभगवन्तमाहन्सुः॥पश्यभगवन्कथंभगवताप्रव्रजितेनमहान्तोजनकायोअनुप्रव्रजितो॥भगवानाह॥नहिभिक्षवोएतरहिंमेवमयाप्रव्रजन्तेनमहाजनः
कायोअनुप्रव्रजितो॥अन्यदापिमयाप्रव्रजन्तेनमहाजनकायोअनुप्रव्रजितो॥भिक्षुआहन्सुः॥अन्यदापिभगवन्॥भगवानाह॥अन्यदापिभिक्षवोभूतपूर्वंभिक्ष
वोअतीतमध्वानेराजाविश्वपतीनामअभूषि॥महाभागोविश्वीयंसन्नविस्तरेणव्याकरोन्ति॥ ॥भगवान्सम्यक्संबुद्धोपरदर्थंतथागतोतमर्थमभिसंभावः
यित्वाराजगृहेविहरतिगृध्रकूटेपर्वतेशास्तादेवानांचमनुष्याणांवसत्कृतोगुरुकृतोमानितोपूजितोअपचितोविस्तरेणकर्तव्यंनिदानंयावच्चेतोवशिप्राप्तानावः
आभगवतोयेहियेहिविहारेहिआकांक्षति॥तेहितेहिविहारेहिविहरन्ति॥अथखलुपंचशिखोगन्धर्वपुत्रोअतिक्रान्तवर्णोअतिक्रान्तकायोरात्रीयेकेवलक
ल्पंगृध्रकूटंपर्वतंवर्णेनओभासयित्वायेनभगवांस्तेनोपसंक्रमित्वाभगवतःपादौशिरसावन्दित्वाएकान्तेअस्थासि॥एकमन्तस्थितोभगवन्तमेतदुवाच॥आरो
चेमहंभदन्तभगवतोप्रतिवेदमहंभदन्तेभगवतोयमयात्रयस्त्रिंशानांदेवानांशक्रस्यचदेवानामिन्द्रस्यमहाब्रह्मणोचसुधर्मायांदेवसभायांनिषण्णानांस
मुखात्श्रुतंसमुखात्प्रतिगृहीतंभाषमाणानां॥एवमुक्तेभगवांपंचशिखंगन्धर्वपुत्रमेतदवोचत॥एकमिदंभगवन्तमपत्रयस्त्रिंशानांदेवानांशक्रस्यदेवानामि
न्द्रस्यआरोचेहिमेत्वंपंचशिखप्रतिवेदेहिमेत्वंपंचशिखयंत्वयात्रयस्त्रिंशानांदेवानांशक्रस्यदेवानामिन्द्रस्यमहाब्रह्मणोचसमुखाश्रुतंसमुखात्प्रतिगृहीतंः
भाषमाणाणां॥एवमुक्तेपंचशिखोगन्धर्वपुत्रोभगवन्तमेतदवोचत॥एकमिदंभगवन्तमयंत्रयस्त्रिंशानदेवानामिन्द्रोमहाब्रह्माचसुधर्मायांदेवसभायांसन्नि

वर्णा अभूंसुः ॥ संनिपतिता केन विदेव देवानां करणीयेन तत्र व भगवानेके देवपुत्रा पश्चादुपपन्ना समाना अन्या पूर्वोपपन्नां देवपुत्रां दिव्येहि पंचहि स्थानेहि अ
भिभवन्ति ॥ आयुषापि वलेनापि यशेनापि श्रियापि परिवारेनापि ॥ एके देवपुत्रा एवमाहंसुः ॥ इमं तावन्मारिष यत्र पथ पश्चादुपपन्ना अन्या पूर्वोपपन्नानां देव
पुत्रां दिव्येहि पंचहि स्थानेहि अभिभवन्ति ॥ आयुषापि वलेनापि यशेनापि श्रियापि परिवारेणापि ॥ तत्र भगवनेके देवपुत्रा एवमाहंसुः ॥ एते खलु मारिष भगव
तो श्रावका भवन्ति ब्रह्मचर्यं चरित्वा कायस्य भेदात्परं मरणात्सुगतिं स्वर्गं कायं त्रायस्त्रिंशे देवनिकाये उपपन्नास्ते एते पश्चादुपपन्ना अन्या पूर्वोपपन्नानां देवपुत्राः
दिव्येहि पंचहि स्थानेहि अतीव शोभवन्ति ॥ आयुषापि वर्णेनापि बलेनापि यशेनापि श्रियापि परिवारेणापि ॥ तत्र भगवनेके देवपुत्रा एवमाहंसुः ॥ अहो पुनर्मारि
ष चत्वारस्तथागता अर्हन्तः सम्यक्संबुद्धा लोके उत्पद्येन्सुः धर्मं च देशयेन्सुः हितं मस्याद्देवानां हितं मनुष्याणां हायेन्सुः ॥ आसुरकाया दिव्याकाया अभिवर्द्धयेन्सुः ॥ ४
तत्र व भगवंस्के देवपुत्रा एवमाहंसुः ॥ दुर्लभा मारिष चतुर्णां तथागतानां महतां सम्यक्संबुद्धानां लोके प्रादुर्भावः ॥ अहो पुनर्मार्ष त्रयस्तथागता अर्हन्तः सम्यक्सं
बुद्धा लोके उत्पद्यन्सुः ॥ धर्मं च देशयन्सुः ॥ हितं मस्याद्देवानां हितं मनुष्याणां हायेन्सुः आसुरकाया अभिवर्द्धयेन्सुः ॥ तत्र भगवनेके देवपुत्रा एवमाहंसुः ॥ दुर्ल
भा मारिष त्रयाणां तथागतानां अर्हन्तानां सम्यक्संबुद्धानां लोके प्रादुर्भावः ॥ अहो पुनर्मार्ष द्वे तथागता अर्हन्तः सम्यक्संबुद्धा लोके उत्पद्येन्सुः धर्मं च देशयन्सुः
हितं मस्याद्देवानां हितं मनुष्याणां हायेन्सुः ॥ आसुरकाया दिव्याकाया अभिवर्द्धेन्सुः ॥ एवमुक्ते भगवन् शक्रो देवानामिन्द्रः त्रयस्त्रिंशांश्च देवानां आमन्त्रयति ॥ अ
स्थानं खल्वेतं मारिष अनवकाशं यदेककाले द्वौ तथागतौ अर्हन्तौ सम्यक्संबुद्धौ लोके उत्पद्येन्सुः ॥ धर्मं च देशयेन्सुः हितमेव स्याद्देवानां हितं मनुष्याणां भावयेन्सुः

भगवन्तं ऋषिवरं तं गतं संमुखं आभिर्गाथाभिरभिष्टवे ॥ अगारवासप्रतीसोढ्ठलक्ष्मत्वान नमंजलिं साधु ते साधुरूपयस्यो ऽसप्रतिपद्यते ॥ साधु [illegible] साध्यं वचनं ते
मनोरमं ॥ साधु अरसंयोगः सर्वसत्त्विद्युराग्निवितः साधुचक्षारि सत्यानि सत्यं प्रवदसे मुने ॥ साधु ते देवगन्धर्वाप्रियजितमधुरा गिरा ॥ साधु अप्र[illegible]वर्त्ति प्रव
र्जिय ॥ तुभ्य लोकसमो नास्ति रूपे वर्णे कुले तथा ॥ ईर्यापथे च वीर्ये च क्षान्ते ज्ञाने तथैव च ॥ अष्ट अष्टादशकोट्यो प्रथमे फले ॥ विनीतास्ते व[illegible] आसने प्रथ
से मुनिः ॥ त्रिंशद्वकोट्यो पुनर्विनीता प्रथमे फले ॥ द्वितीये आसने वीर देवपुत्रष्व सारिव ॥ पंचाशकोट्यो भूयः आसने तृतीये पुनः ॥ विनीतास्ते देवपुत्रा [illegible]
मोचिता ॥ अशीतिकोट्यो भूयः श्रोतापत्तिफले विभुः ॥ चतुर्थ आसने नीता दुर्गतीभ्यो विमोचिताः ॥ तस्मात्ते सदृशो नास्ति सेत्वाय पुरुषोत्तमः ॥ करुणा[illegible]
[illegible]जोस्तमयनरर्षभः ॥ दृष्टा पुरुषश्चाईल्लयन्तो लोकसुन्दरो ॥ हिताय सर्वसत्त्वानां चिरं तिष्ठ महामुने ॥ अचिरस्थराजसुनो ऽयन्तो सितनरर्षभः ॥ प्रणीता वि[illegible]
[illegible]भ्यानानयनंदद ॥ नामानुकम्पा चिन्मूनगुरुनाभी अन्नाहायत्र अपर्यन्तानवस्थानुभवत्तु लोकनायका ॥ अपायान्तत्रकी भूतास्त्वयं भूतव तेजसा ॥ निराकाशो [illegible]
गैः त्वां प्राप्य पुरुषोत्तमा ॥ यतोऽसि पुरुषपुङ्गवस्त्व अनियतो राशि त्वं प्राप्य पूरयिष्यति ॥ यश्चाप्यनियतो राशि त्वां प्राप्य सुरवन्दितः ॥ पूरयिष्यति संस्पृक्त्वा नियतो
राशिं राजकुलोदित ॥ अद्भुतानां धर्माणां विद्वद्भिरुपलभ्यते ॥ त्वां प्राप्य पुरुषादित्यं ततो नोत्करस्यते ॥ तस्य ते साधुस्त्वाराभूता धर्मोजप्रिय ॥ अभिनंदन्ति ते वाक्यं ३४४
सेख्यातो लोके महामुने ॥ इति स्तुवन्ति देवगणा वरदं श्रीतिमानं ॥ अनन्तगुणसंपन्नं सार्थवाहनरोत्तममिति ॥ ॥ भिक्षुर्भगवन्तमाहन्तुः ॥ कस्य भगवन्कर्मस्य
विपाकेन आयुष्मता आज्ञातकौण्डिन्येन सर्वप्रथमं धर्मो आज्ञातो ॥ भगवानाह ॥ एतस्मिन्नेव भिक्षवः पूर्वप्रणिधानं भूतपूर्वं भिक्षवोऽतीतमध्वानं राजगृहे नगरे कुम्भ
कारशालायां प्रत्येकबुद्धेन पित्तव्याधिनेन प्रतिश्रयो याचितो सो तेन कुम्भकारेण उपस्थितो च पित्तावाधातो मोचितो ॥ तेन दानि प्रत्येकबुद्धेन स्थे परिवारिता प्रत्येकबु

श्रान्तेन हि भार्गव शालायां तस्य प्रत्येकबुद्धस्य पित्तव्याधिकस्य क्षेमरागी यवागू आगता भार्गवेन तं प्रत्येकबुद्धं ततः पित्तवाधातो मोचेत्वा एहकनि ॥ केन वा प्रथमं धर्मं आज्ञातं ॥ सो
प्रत्येकबुद्धो आह ॥ मया सर्वप्रथमं धर्मो आज्ञातो पश्चाद्देतेहि ॥ सा दानि भार्गवो प्रणिधानं कृत्वा देति यं मया कुशलमूलं उपचितं तेन वउपस्थानपरिचर्यां कृत्वा तेन कुशलमूलेन
अहमपि सर्वप्रथमं बुद्धस्य भगवतो धर्मं देशितं आजानेयं ॥ न च लाभसत्कारं स्पृहयेयं श्रावकानि च शय्यासनानि स्पृहयेयं इतरेतरेषां च पिण्डपात्रेण संतुष्टो भवेयं निकुरखु
वनखण्डेषु एकस्य न्तुगभूतस्य शरीरं ति संपन्नं भवेया ॥ भगवानाह ॥ स्यात्खलु पुन भिक्षवो युष्माकमेवमस्यादन्यः स तेन कालेन तेन समयेन राजगृहे भार्गवो अभूषि न खल्व
नं एवं द्रष्टव्यं ॥ तत्कस्य हेतोः ॥ एष स भिक्षवो आज्ञातकौण्डिन्यस्य स्थविरो तेन कालेन तेन समयेन राजगृहे नगरे भार्गवो अभूषि ॥ यं तेन प्रत्येकबुद्धस्य पित्ताबाधिकस्य प्रतिश्रये
गादिन्नेन च पारिचर्यां कृत्वा प्रणिधानं च उत्पादितं ॥ यथा व धर्मं आज्ञातो पश्चाद्देते हि स्वयमहमपि सर्वप्रथमं बुद्धस्य भगवतो धर्मं देशितं आजानेयां तस्य कर्मस्य विपाकेन तेन आज्ञा
तकौण्डिन्येन सर्वप्रथमं धर्मं आज्ञातं पश्चाद्देते हि यं मया कुशलमूलं उपचितं अशनवसनभक्षपरिचरियाये तेन कुशलमूलेन पुरुषवर ऋषभसमागमो भवतु ॥ यथा च त्व
या सर्वप्रथमं धर्मो आज्ञातो पश्चाद्देते हि ॥ एवमहं सर्वप्रथमं धर्मं देशितं आजानेयं जिनस्य अलब्धः संतुष्टो इतरेतरेण पिण्डकेन यापेन्तो प्रशमसुखं स्पृहितमवो त्वाम
तत्कारं स्पृहयेयं ॥ शान्तारण्यपाश्रयम् पृथिवि पर्वतानि तत्र मम निधनसमये शरीरनिक्षेपो भवेया सत्कृतमसत्कृता वा आयुर्विज्ञानउपगतो चकस्य जनेन्द्रधीतिंध
रणीरज नमे वृत्तशरीरे ॥ ॥ इति श्री महावस्तु अवदाने आज्ञातकौण्डिन्यजातकं समाप्तं ॥ ॥ भिक्षु भगवन्तमाहन्सुः ॥ भगवता आत्मपरित्यागानि कृत्वा पुत्रपरि
त्यागानि च कृत्वा दारपरित्यागानि कृत्वा अर्थपरित्यागानि च कृत्वा राज्यपरित्यागानि च कृत्वा अनुत्तरां सम्यक्संबोधिमभिसंबुद्धित्वा आज्ञातकौण्डिन्यः महता अर्थेन संयो
जितः ॥ भगवानाह ॥ न भिक्षवः एतरहि मेव मया एष आज्ञातकौण्डिन्यो महता अर्थेन संयोजितो ॥ अन्यदापि एषो मया आत्मत्यागं कृत्वा महता अर्थेन संयोजितः ॥ भि

अभ्यस्तुः ॥ दुःप्रसहो सम्यक्संबुद्धो परिषदि धर्मं देशयति भगवान्दुष्प्रसहो ब्रह्मी मधुषि ब्रह्मघोषा षाव निश्चरति विस्मिता परिषा भगवन्तं दुष्प्रसहं पृच्छति ॥ भग [illegible] घोषो निश्चर
ति ॥ तस्मिं निश्चरन्ते महर्षिणा धर्मचक्रवाचान्नृह्मी अभ्र लोकनाथे दुष्प्रसहो विस्मिता परिपषत्कराविंकमञ्जुघोषो मेघस्तनितदुन्दुभिस्वराभिगमो निश्चर [illegible]
लनि वादिनां श्रवरो भगवां ॥ दुष्प्रसहो आह ॥ लोकधातु महानाम नञ्च शाक्यमुनिर्जिनः ॥ धर्मचक्रं प्रवर्त्तितं यस्य घोषो निश्चरति ॥ लोकधातुसहस्राणा असं [illegible]
घोषयो ॥ श्रूयते वरवल्गुनि स्वय यथा दूरे थसन्तिके ॥ स्वं महानुभावो यं परिपूर्णा मनोरथ्या ॥ द्विपदश्रेष्ठ शासं विभागं प्रवर्त्तंनि संबुद्धो वोधिनाधिना इति ॥ येन स्वरेण स [illegible]
हिं सम्यक्संबुद्धो वाराणस्यां ऋषिपतने मृगदावे त्रिपरिवर्त्तं द्वादशाकारं अनुत्तरं धर्ममेव चक्रं प्रवर्त्तयेसि सोस्वरो षष्ठिभिराकारैः समन्वागतः कतमैः षष्ठिभिर्गम्भीरश्च [illegible]
गतस्वरो श्री अरूपश्च आत्तयश्च हृदयंगमश्च प्रेमणीयश्च आसेचनीकश्च अप्रतिवाणीश्च विस्पष्टश्च अप्रतिकूलश्च अवर्णश्च अच्छिद्रश्च अप्रभारश्च अकल्माषश्च रथनेमिघोष
श्च मेघस्तनितमेघगर्जितस्वरश्च वातहष्टिलनितसमगर्जितस्वरश्च रम्रस्वरश्च देवस्वरश्च ब्रह्मस्वरश्च अनुकूलस्वरश्च अउष्टस्वरश्च अनुढस्वरश्च अनुत्तनश्च अनुत्कमश्च ॥
अक्षुभितश्च अर्थस्वरश्च सत्यस्वरश्च श्रीमस्वरश्च पुष्कवलस्वरश्च सिंहस्वरश्च नागस्वरश्च वृषभस्वरश्च ॥ आजानेयस्वरश्च क्रौञ्चस्वरश्च करविंकस्वरश्च कोकिलस्वरश्च वर्णस्वरश्च
मंजुस्वरश्च विज्ञानस्वरश्च अर्थरसंपन्नश्च विज्ञानसंपन्नश्च स्फुटसम्पन्नश्च विस्तारसम्पन्नाश्च कुशलजातसम्पन्नश्च सत्यविस्तारसंपन्नश्च सत्यकुशलमूलजातसम्पन्नश्च सु
स्वरसम्पन्नश्च हर्षणीयस्वरश्च तन्त्रीस्वरश्च गीतस्वरश्च वादित्रस्वरश्च कंसस्वरश्च पुष्करस्वरश्च अतिस्वरश्च दुन्दुभिस्वरश्च अनुत्तरस्वरश्च तथागतस्वर सर्वदिशां तथा
गतस्वर पुनः स्फुरति न कहिंचिन्प्रतिहन्यते ॥ येन स्वरेण समन्वागतस्तथागता अर्हन्न सम्यक्संबुद्धो वाराणस्यां ऋषिपतने मृगदावे त्रिपरिवर्त्तं द्वादशाकारं धर्मचक्रं प्र
वर्त्तेति सो स्वरोऽस्मिः षष्ठिभिराकाराकारैः समन्वागताः अथ खलु महाब्रह्मा तायेवेलाये भगवन्तं संमुखंदरभिः सारूप्यगाथाभिरभिस्तवे ॥ सत्त्वसारवरायेणाइक्ष्वा।

कुशलसंभवे ॥ धर्मचक्रप्रवर्त्तितेन ॥ मेदिनीषड्कम्पिता उत्पाताचनमेभीष्मा अशीतिसमव्यथा ॥ धर्मचक्रस्य तेजेन अशीतिं पुनर्भूमिजं ॥ ओघपुष्पविचित्रांगा उत्पन्न
निवलाहका ॥ अनेकपुष्पचित्रांगा मेघाकुसुमसंचया ॥ काशीहितकरं नाथं आकिरेसुर्नरोत्तमं ॥ गजाइव प्रमुक्ताङ्गा उत्पन्ननिवलाहका ॥ हेमकंठधराभीमा मेघाकुसुम
संचया ॥ कृत्वा न नरसिंहस्य धर्मकायमुपस्थितं ॥ सनत्कुमारो विनेति संस्तवामेतथागतं ॥ सोचभूतेन वर्णेन नयायेसु विजानितु ॥ सर्वे गगने स्थाने ब्रह्मा सर्वार्थदर्शि
ना ॥ तुङ्गसागरपर्यन्तं तिषरां रतनावतीं ॥ कम्पन्ते योनिसाहस्रांवाजनं क्षिपसि गोतमं ॥ आलोकेमात्रसंविप्रा[illegible]दशासमन्ततः ॥ ताये आपुथश्रुतस्मि क्षिप्र क्षिंपुरु
षोत्तमो ॥ उत्क्षिपयन्तो विपर्यांषोदष्टियुहरादिश्रितां ॥ तागतागेन्द्रनरेश्वराजो सिंहवनाजितः ॥ सिंहो यथा अमुत्रसो पर्वतानन्तरनिश्रितो ॥ त्रासयन्तोऽपरिंसर्वांगजः
सिंहवनाजितः ॥ मारपक्षे अमुहन्त्वं मारसेनाप्रमर्दनं ॥ दक्षिणेन च बाहुना उच्छ्रयेसि जिनध्वजं ॥ महारत्नविनिर्घोषो कम्पते सोनसीदति ॥ स्वरेरावदन्तो तथानुस्तुता
चवकुम्भरे ॥ हेमकाञ्चनवर्णाभं भाजंतिच्चमचमथ ॥ स्तुतिंमनन्ता अभिकिरेसुः मेरुगगणाश्रिता ॥ प्रसन्नचित्ताकुसुमतोप्राञ्जलीप्रमुदेन्द्रियः ॥ धर्मचक्रमहं कृ
त्वा तेनास्मइहागतो ॥ भगवता प्रथमे धर्मचक्रप्रवर्त्तनसूत्रे आज्ञातकौण्डिन्यो अष्टादशाचदेवकोट्यो विनीता ते देवादेवभवनेषु आरोचेन्तास्वकस्वकानि भवनानि गच्छन्ति ॥ स
र्वे अशरणाः स्कन्धा अधिनष्टा महाभया ॥ अनिःसृता असाराच इति भाषन्त गोतमो ॥ अलंभवाब्रस्ताप्रयसन्नार्थदर्शिमांडुड्वैरभयातीतं अभिक्रमंमनवन्तं ॥ त्रिंशद्देवता
कोट्यो ऋषिपत्तनमागता ॥ ते द्वितीये धर्मचक्रप्रवर्त्तनसूत्रे भाष्यमाणे विनीता ते पि भवनेषु रोचेन्ता स्वकस्वकानि भवनानि गच्छन्ति ॥ तेषां श्रुत्वा पंचाशद्देवकोट्यो
आगता ते पि भगवता ॥ तृतीये धर्मचक्रप्रवर्त्तनसूत्रे विनीता ते पि देवभवनेषु आरोचेन्ता स्वकस्वकानि भवनानि गच्छन्ति ॥ तेषां श्रुत्वा अशीति देवकोट्यो आगता ते
पि भगवता ॥ चतुर्थे धर्मचक्रप्रवर्त्तनसूत्रे विनीता ते पि देवभवनेषु आरोचेन्ता स्वकस्वकानि भवनानि गच्छन्ति ॥ अथ खलु शिखरधरो नाम तुषितकायिको देवपुत्रो

वदिअनुशासनमानुशासे ॥ एवं भिक्षवः मनसाकरोथ एवं मानसीकरोथ ॥ इमां वितर्कां वितर्केथ ॥ इमां वितर्कांमा वितर्कयथ ॥ आत्मद्वीपा भिक्षवः विहरथ ॥ अ
पा आत्मशरणा अनन्यशरणा धर्मद्वीपा धर्मशरणा अनन्यशरणा ॥ तेहित्तो भिक्षवो आत्मद्वीपेहि विहरन्तेहि अनन्यद्वीपेहि आत्मशरणेहि धर्मद्वीपेहि धर्मशर
हि अनन्यशरणेहि योनिशो उपपरीक्षितव्यो ॥ किंमूलका उत्पद्यन्ति शोकपरिदेवदुःखदौर्मनस्य ॥ पायासाः संभवन्ति किंजातिको किंप्रभूतिका ॥ एवमुक्ते भिक्षुभ
गवन्तमेतदवोचत् ॥ भवन्तमूलका भगावन्धर्मा भवन्नेत्रिका भवन्तः प्रभवाः भगवन्तः प्रतिशरणा ॥ साधु भगवां भिक्षुणामेतमर्थं भाषे ॥ भिक्षु भगवतो संमुखा
श्रुत्वा संमुखा प्रतिगृहीत्वा प्रविवेकितत्वा यथा धारयिष्यन्ति ॥ एवमुक्ते भिक्षुं भगवानेतदवोचत् रूपमूलका भिक्षव उत्पद्यन्ति शोकपरिदेवदुःखदौर्मनस्या पायासा
संभवन्ति ॥ रूपजातिका वा रूपप्रभूतिका वा ॥ सचेत्मन्यथ भिक्षवो रूपं नित्यं वा अनित्यं वा रूपमनित्यं हीदं भगवन् साधु भिक्षवः प्ररूपस्य भिक्षवः अनित्यतां विदित्वा दुर्बल
तां प्रभंगुरतां विपरिणामविरागनिरोधतां विहित्वा ये रूपप्रत्यया उत्पद्यन्ति आश्रवा विघाता परिदाघा सज्वरा सांक्लेशिका पोनर्भविका आयत्यां जातिजारामरणी यो सचेत्मन्यथ
भिक्षवो वेदना संज्ञा संस्काराः विज्ञानं नित्यं वा अनित्यं वा ॥ अनित्यं हीदं भगवन् ॥ भगवानाह ॥ साधु भिक्षवो विज्ञानस्य खलु पुनर्भिक्षवो अनित्यं वा दुर्बलतां प्रभंगुरतां विदित्वा ने
निरुध्यन्ति व्युपशाम्यन्ति प्रहाणामस्तंगच्छन्ति ॥ तेषां निरोधात्तो न उत्पद्यन्ति ॥ आश्रवा विघाता तोपरिदाहा सज्वराः सांक्लेसिका पोनर्भविका आयत्यां जातिजरामरणीया
निरुध्यन्ति तेषां निरोधान्नोत्पद्यन्ति विज्ञानमूलका आश्रवा विघाता परिदाघा सज्वराः सांक्लेसिका पौनर्भविका आयत्यां जरामरणीया विज्ञानजातिका विज्ञानप्रभूतिक
कास्तस्मादिह वो भिक्षवः अत्र शिक्षितव्यं ॥ यत्किंचिद्रूपं अध्यात्मं वा बहिर्धा वा औदारिकं वा सूक्ष्मं वा हीनं वा प्रणीतं वा यद्दूरे अन्तिके वा अतीतानागतप्रत्युत्पन्नं सर्वं रूपं
नैतं मम नैषोऽहमस्मि नैष आत्मेति ॥ एवमेतं यथाभूतं सम्यक्प्रज्ञया द्रष्टव्यं ॥ इदमवोचद्भगवान् वाराणस्यां विहरन्तो ऋषिपत्तने मृगदावे ॥ इमस्मिंश्च पुन व्याकरणे

भाष्यमाणे त्रयो भिक्षुबलवशीभावप्राप्तरोत्सुः । अशीतीनां च येवकोटीनां विरजं विगतमलं धर्मेषु धर्मचक्षुर्विशुद्धानि आजमनाते भिक्षु भगवतो भाषितमभिनन्दे ॥ ॥
अथ खलु भगवां आषाढमासस्य उत्तरपक्षे द्वादशीयं पश्चाभक्तः उरस्तात्संमुखो निषण्णो ध्यस्थर्द्धे पोहृषायोच्छ्रयायां अनुराठे नक्षत्रे विजये मुहुर्त्ते अनुत्तरं धर्मचक्रं प्रवर्त्ति
तं ॥ न खलु पुनर्भगवतो सुवर्णमयं वा धर्मचक्रं प्रवर्त्तितं रूप्यमयं वा मुक्तामयं वा वार्यमयं वा स्फाटिकमयं वा मुसागल्वमयं वा लोहितिकामयं वा रीडिकामयं वा ना
ग्रमयं वा लोहमयं वा शैलमयं वा दारुमयं मृत्तिकामयं वा ॥ अथ खल्वेमां स्वेवं चत्वार्यार्यसत्यानि त्रिपरिवर्त्तं द्वादशाकारं धर्मचक्रं प्रवर्त्तितं तथाप्य मं धर्मचक्रं प्रवर्त्त
नसूत्रे आयुष्मतो आज्ञातकौण्डिन्यस्य विरजो विगतमलं धर्मेषु धर्मचक्षुर्विशुद्धं अष्टादशानां देवकोटीनां च ॥ इयं च महापृथिवी अतिरिव षड्विकारं कम्पे प्रकम्पे संप्रकम्पे वेधे प्रवेधे
संप्रवेधे सर्वतो अधिध्यायति वामतो पि अधिध्यायति ॥ वामदक्षिणतो पि अभिध्यायति संहर्षणीयं च कंपयति दर्शनीयं च कंपयति तोषणीयं च कंपयति प्रेमणीयं च प्रह्लादनीयं
च निर्वापनीयं च उत्स्नोकनीयं वा सेचनकं चाप्रतिकूलं च प्रासादिकं च प्रसनीयं च विहृदेयं च तिरुत्वासं चकंपति कंपमानाता च पुनर्महापृथिवी न किंचित् सत्वं व्याबाहति ॥ यदिदं त्रसं वा
स्थावरं वा भगवं प्रभावेना इमे यं च लोके ओभासमभूषि ॥ अतिक्रम्य देवानां देवानुभावं नागानां नागानुभावं यक्षानां यक्षानुभाव ॥ यापि ती लोकान्तरिका अन्धकारां पिततामाता तम
सातमसा यितत्वा अघो अपअक्षंभूता असंभूतपूर्वा ॥ यत्रेमे चन्द्रमसूर्या एवं महर्द्धिका एवं महानुभावा आभाये आभानाभिसंभुणानि आलोके नवालोकं तस्फुरणिताया पि
तो ते नाव भासेन स्फुट अभूत्सुः ये पि तत्र सत्वा उपपन्नाते प्यन्यमन्यं संजानेत्सुः ॥ अन्येपि किल भो सत्वा उपपन्ना अन्येपि किल भो इह सत्वानुपपन्ना स्फान्त सुखसमर्पिता
च पुनस्तस्मिं क्षणांत स्मुहुर्त्ते सर्वसत्वा अभूत्सुः ये पि वावीचिस्मिं महानरके उपपन्ना ॥ ॥ भगवां धर्मचक्रं प्रवर्त्तनो एकषष्टिं त्रिसाहस्रमहासाहस्रलोकधातुं भाषमाणां
स्वरेणाभिविज्ञापेति ॥ ततो च परेणाड्ढ्रसेनात्रीणि येव तस्मिं समये शुद्धा भगवन्तं ते आंतेवासिं च परलोकधातुषु परिषद्धिर्धर्मं देशेन्ति ॥ ते भगवतो धर्मचक्रं प्रवर्त्तनस्यतूष्णी

त्मा अभविष्यत् नेदं विज्ञानं आवाय दुःखाय संवर्त्तेति लभ्येत विज्ञानं कामकारिकता एवं मे विज्ञानं भवतु एवं मा भवतु ॥ यस्मा भिक्षवो विज्ञानम नात्मा तस्मा
दुःखाय संवर्त्तति न चात्र विध्यति कामकारिकता ॥ एवं मे विज्ञानं भवतु एवं मा भवतु ॥ तस्मादिह भिक्षवः एवं शिक्षितव्यं यत्किञ्चिद्रुपं अध्यात्मं वा वहिर्द्धा वा औदा
हीनं वा प्रणीतं वा ये दूरे अन्तिके वा अतीतानागतप्रत्युत्पन्नं वा सर्वं रुपं नैतं मम नैषो हमस्मि न त्वेष मात्मेति एवमेतं यथाभूतं सम्यक्प्रज्ञया द्रष्टव्यं ॥ या काचिद्वेदनाया का
ये केचित्संस्कारा ये केचि विज्ञानं अध्यात्मं वा वहिर्द्धा वा औदारिकं वा सूक्ष्मं वा हीनं वा प्रणीतं वा यं दूरे अन्तिके वा अतीतानागतप्रत्युत्पन्नं वा सर्वं विज्ञानं नैतं मम नैषो हमस्मि
एत नात्मेति ॥ एवमेतं यथाभूतं सम्यक्प्रज्ञया द्रष्टव्यं ॥ इदमवोच भगवां वाराणस्यां विहरन्तो ऋषिपतने मृगदावे इमस्मिंश्च पुनर्व्याकरणे भाष्यमाणे आयुष्मतो आज्ञात
कौण्डिन्यस्यानुपादायाश्रवेभ्यः चित्तं विमुक्तं चतुर्णां च भिक्षुणां विरजं विगतमलं धर्मेषु धर्मचक्षुर्विशुद्धानि ॥ आयुष्मतो अश्वकिस्य भद्रिकस्य वा—स्य महानामस्य त्रिंशति
नां च देवकोटीनां विरजं विगतमलं धर्मेषु धर्मचक्षुर्विशुद्धानि आज्ञातमना आयुष्मन्तो पंचकाभद्रवर्गिका भगवतो भाषितमभ्यनन्दे ॥ ॥ भगवान्संम्यक्संबुद्धो यदर्थं समु
दागतो तमर्थं अभिसंभावयित्वा वाराणस्यां विहरन्ति ऋषिपतने मृगदावे ॥ तत्र खलु भगवां आयुष्मन्तं पंचकाभद्रवर्गिका मामन्त्रयसि ॥ सचेत्मन्यथ भिक्षवः किंमूलि
का उत्पद्यन्ति ॥ शोकपरिदेवदुःखदौर्मनस्योपायासाः संभवन्ति ॥ किंजातिका किंप्रभृतिका ॥ एवमुक्ते आयुष्मन्ताः पंचभद्रवर्गीया भगवन्तमेतदुवोचत् ॥ भवमूलका खलु
भगवन्धर्मा नेत्रीका भगवन्भवप्रभवा भगवन्भवप्रतिशरणा साधु भगवान्भिक्षूणामेतमर्थं भाषे ॥ भिक्षु भगवतो संमुखाच्छ्रुत्वा संमुखात्प्रतिगृहीत्वा तथत्वाय धारयिष्य
न्ति ॥ एवमुक्ते भगवां पंचकाभद्रवर्गीयांमेतदवोचत् ॥ रूपमूलका भिक्षवो उत्पद्यन्ति शोकपरिदेवदुःखदौर्मनस्योपायासाः संभवन्ति ॥ रूपजातिका रूपप्रभृतिका ॥ वे
दनामूलका संज्ञामूलका संस्कारमूलका विज्ञानमूलका भिक्षवः उत्पद्यन्ति शोकपरिदेवदुःखदौर्मनस्योपायासाः संभवन्ति ॥ विज्ञानजातिका विज्ञानप्रभृतिका सचे

तमन्यथाभिक्षवोरूपंनित्यंवाअनित्यंवाविदित्वाचरन्तां॥ अनित्यंहितंभगवन्॥ खलुपुनर्भिक्षवोअनित्यंवाविदित्वाचलतांप्रभंगुरतांविपरिणामविरागनिरोधतांविदित्वाये
रूपप्रत्ययाउत्पद्येन्तुः॥ आश्रवाविघातापरिदाघासज्वरास्तांक्लेशिकापौनर्भविकाआरत्यांआयत्यांजातिजरामरणीयास्तेनिरुध्यन्ते॥ तेषांनिरोधान्नउत्पद्येआश्रवाविघा
तापरिदाघासज्वरास्तांक्लेशिकापौनर्भविकाआरत्यांजातिजरामरणीयास्तेत्तमन्यथाभिक्षवोवेदनासंज्ञासंस्काराविज्ञानंनित्यंवाअनित्यंवाअनित्यंहितंभगवन्॥ भगवाना
हा॥ सार्धुनिःसंवाविज्ञानस्यखलुपुनर्भिक्षवोअनित्यतांविदित्वाचलतांप्रभंगुरतांविपरिणामविरागनिरोधतांविदित्वायेविज्ञानप्रत्ययाउत्पद्येन्तुः आश्रवाविघातापरिदा
सज्वरास्तांक्लेशिकापौनर्भविकाजातिजरामरणीयास्तेनिरुध्यन्तिव्युपशाम्यन्तिप्रहराणास्त्वंगच्छन्ति॥ तेषांनिरोधान्नोत्पद्यन्तिविज्ञानमूलकाआश्रवाविघातापरिदाघास
ज्वरास्तांक्लेशिकापौनर्भविकाआयत्यांजातिजरामरणीयाविज्ञानजातिकाविज्ञानप्रभृतिकास्तस्मादिहवोभिक्षवः शिक्षितव्यं। यत्किंचिद्रूपंअध्यात्मंवाबहिर्धावाऔदा
रिकंवासूक्ष्मंवाहीनंवाप्रणीतंवायंदूरन्तिकेअतीतमनागतंप्रत्युत्पन्नंसर्वंरूपंनएतेममएषोहमस्मिनएषोआत्मानिएवंवोभिक्षवः शिक्षितव्यंयोकाचिद्वेदनायोकाचित्सं
ज्ञायेकेचित्संस्कारायेकेचिद्विज्ञानंअध्यात्मंवाबहिर्धावाऔदारिकंवासूक्ष्मंवाहीनंवाप्रणीतंवायंदूरेअन्तिकेवाअतीतानागतप्रत्युत्पन्नंनैतंममनैषोहमस्मिनैषआत्मानि
॥ एवमेतंयथाभूतंसम्यक्प्रज्ञयाद्रष्टव्यं॥ इदमवोचभगवांवाराणस्यांविहरन्तो॥ ऋषिवदनेमृगदावेइमस्मिंश्चपुनर्व्याकरणेभाष्यमाणेआयुष्मानाज्ञातकौण्डिन्योवलवशी
भावंप्राप्तोसौ॥ चतुर्णांभिक्षूणामनुपादायाश्रवेभ्यश्चित्तानिविमुक्तानिआयुष्मतोअश्वकिस्यभद्रिकस्यवाष्पस्यमहानामस्यपंचाभिज्ञानायांचदेवकोटीनांविरजंविग
तमलंधर्मेषुधर्मचक्षुर्विशुद्धानिआज्ञातमनाआयुष्मन्तापंचकाभद्रवर्गिकाभगवतोभाषितमभिनन्दुः॥ ॥भगवान्तस्यक्तंउद्रोयरथंसमुदागतोतमर्थंमभि
संभावयित्वावाराणस्यांविहरति॥ ऋषिपतनेमृगदावेतेनखलुपुनःसमयेनश्रोभिक्षूर्वाराणसिंपिण्डायप्रक्रमेन्त्रयोभिक्षुभगवांचेतसायंचित्तानिअधिष्ठायओ

यतश्चाहं भिक्षव इमानि चत्वार्यार्य्यसत्यानि एवं त्रिपरिवर्त्तं द्वादशाकारं यथाभूतं सम्यक्ज्ञानयानात्यज्ञासिषं न तावदहं अनुत्तरां सम्यक्संबोधिम [illegible] ोप्रतिजाने हं नाप
तावमे ज्ञानमुत्पादि अकोप्या च मे चेतोमुक्तिः साक्षीकृता यतो अहं भिक्षवः इमानि चत्वार्यार्य्यसत्यानि एवं त्रिपरिवर्त्तं द्वादशाकारं यथाभूतं सम्यक्ज्ञा [illegible] ज्ञासिषं ॥ अथा
हं अनुत्तरीसम्यक्त्वबोधिमभिसंबुद्धो ति प्रजानामि ज्ञानं च मे उदपादि अकोप्या च मे चेतोविमुक्तिः प्रज्ञाविमुक्तिः साक्षीकृता ॥ इदमवोचद्भगवान्वाराणस्यां [illegible] षिपत्तने
मृगदावे इतस्मिं च पुनर्व्याकरणे आयुष्मतो आज्ञातकौण्डिन्यस्य विरजं विगतमलं धर्मचक्षुर्विशुद्धं अष्टादशानां च देवकोटीनां विरजं विगतमलं धर्मचक्षु [illegible]
महापृथिवी अतिरिव षड्विकारं कम्पेच्छिन्नभिवपन्चवेधे संप्रवेधे पुरस्तिमश्च अन्तो उन्नमति पश्चिमो च अन्तो ओनमे पश्चिमो च अन्तो उन्नमे पुरस्तिमो च अन्तो ओन [illegible]
न्तो उन्नमे उत्तरा चान्तो ओनमे उत्तरा चान्तो उन्नमे दक्षिणा चान्तो ओनमे मध्ये च ओनमे अन्तो उन्नमे अन्तो ओनमे मध्ये उन्नमे ॥ अप्रमेयं च लोके ओभासमभूषि अतिक्रा [illegible]
नां देवानुभावं नागानां नागानुभावं यक्षाणां यक्षानुभावं यापि तां लोकान्तरिका अन्धकारा पितन्ना निमिरिणा मनिरिमा यितत्वा आसंविदिता आसंविदितपूर्वा यत्र मे चन्द्र
सूर्यौ एवं महर्द्धिकौ एवं महानुभावौ आभाये आभां नाभिसंभुणान्ति आलोकेन वा लोकं स्फुरन्ति तापि च ते ओभासेन स्फुटा अभूषि ॥ अन्यापि ये पि तत्र सत्वा उपपन्ना ते पि
ते न ओभासेन अन्यमन्यं संजानन्तु ॥ अन्ये पि किल भो सत्वा उपपन्नाः अन्ये पि किल भो सत्वा इह उपपन्ना एकान्तसुखसमर्पिता च पुन स्मक्षणं तन्मुहूर्तं सर्वे सत्वा अभवन्तुः
ये पि अवचनेता निरये उपपन्ना भूम्या च देवा घोषमुदीरयेन्तुः शब्दमनुश्रावयेन्तुः ॥ एतं मारिष भगवता वाराणस्यां ऋषिपत्तने मृगदावे त्रिपरिवर्त्तं द्वादशाकारमनुत्तरं
धर्मचक्रं प्रवर्त्तितं ॥ अप्रवर्त्यं केन चि श्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा केनचि वा पुनर्लोके सहधर्मेण भविष्यति ॥ बहुजनहिताय बहुजनसुखाय लोकानुकं
पाय महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च हायिष्यन्ति आसुरा काया दिव्याकाया अभिवर्द्धिष्यन्ति भूम्यानां देवानां घोषं श्रुत्वा चतुर्महाराजिका

देवा घोषमुदीरयेन्सुः ॥ शब्दमनुश्रावयेन्सुः त्रयस्त्रिंशा देवा यामा तुषिता देवा निर्माणरतयो देवा ब्रह्मकायिका देवा घोषमुदीरयेन्सुः शब्दमनुश्रावयेन्सुः ॥ एवं मारिष भगवता वाराणस्यां ऋषिपतने मृगदावे त्रिपरिवर्त्तं द्वादशाकारं अनुत्तरं धर्मचक्रं प्रवर्त्तितं ॥ अप्रवर्त्त्यं केनचिच्छ्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा अन्येन वा पुनर्लोके सह धर्मेणा तं भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकम्पाय महतो जनकस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च हापिष्यन्ति आसुराः काया दिव्या काया अभिवर्धिष्यन्ति ॥ आत्तमना आयुष्मन्तो पंचका भद्रवर्गीका भगवतो भाषितमभिनन्द ॥ ॥ भगवानन्तस्वक्तं तु कोयदर्थं समनुदागतो तमर्थमभिसंभावयित्वा वाराणस्यां विहरति शास्ता देवानां च मनुष्याणां च ॥ तत्र खलु भगवानायुष्मन्तां पंचकां भद्रवर्गिकानां आमन्त्रयति ॥ रूपं भिक्षवो अनात्मा वेदनो अनात्मा संज्ञा अनात्मा संस्कारा अनात्मा विज्ञानं अनात्मं चेदं रूपं चे भिक्षवः आत्मा अभविष्यत् न च रूपं आबाधाय दुःखाय संवर्त्तते लभ्येच रूपे कामकामता ॥ एवं मे रूपं भवतु एवं मा भवतु ॥ यस्मा च भिक्षवो रूपं अनात्मा तस्माद्रुप आबाधाय दुःखाय संवर्त्तति न चात्र लभ्यति कामकारिकता ॥ एवं मे रूपं भवतु एवं मा भवतु ॥ इयं वेदना चे भिक्षवः आत्मा अभविष्यत् ॥ न च वेदना आबायदुःखाय संवर्त्तेति ॥ लभ्या एवं वेदनाया कामकारिकता एवं मे वेदना मा भवतु ॥ यस्मात्भिक्षवो वेदना अनात्मा तस्माद्वेदना आबाधाय दुःखसमुदयाय संवर्त्तति न चात्र लभ्यति कामकारिकता ॥ एवं वेदना भवतु एवं मा भवतु ॥ इयं संज्ञा चे भिक्षवः आत्मा अभविष्यन्न भवति संज्ञा आबाधाय दुःखाय रिध्यति च कामकारिमता ॥ एवं मे संज्ञा भवतु एवं मे मा भवतु ॥ यस्मात्भिक्षवः संज्ञा अनात्मा तस्मात्संज्ञा आबाधाय दुःखाय संवर्त्तति न चात्र रिध्यति संज्ञाय कामकारिकता ॥ एवं मे संज्ञा भवतु एवं मे मा भवतु ॥ संस्कारो भिक्षवो आबाधास संस्कारा चे भिक्षवः संस्कारा अनात्मा आत्मा अभविष्यन्न चैते संस्कारा आबाधाय दुःखाय संवर्त्तेन्ति लभ्या च संस्काराणां कामकारिकता ॥ एवं मे च संस्कारा भवन्तु एवं मे मा भवन्तु ॥ यस्माद्भिक्षवः संस्कारा अनात्मा तस्मात्संस्कारा आबाधाय दुःखाय संवर्त्तन्ति न चात्र रिध्यति कामकारिकता ॥ एवं मे संस्कारा भवन्तु एवं मा भवन्तु ॥ विज्ञानं भिक्षवो आः

अभिभूर्योचतुर्योजनप्रभोअभिभूर्पञ्चशोयोजनप्रभोसुदर्शयायोजनप्रभोसुदर्शीनोयोजनप्रभोसर्वाभिभूःषष्ठियोजनप्रभोवैरोचनोसप्तयोजनप्रभोसर्वपश्चिमोरो [illegible]
मदशयोजनप्रभो॥ ॥एवंमयाश्रुतमेकस्मिंसमयेभगवांवाराणस्यांविहरतिऋषिपतनेमृगदावेतत्रभगवानाउष्मन्तोपञ्चकाभद्रवर्गीकानामन्त्रेसिभिक्षवश [illegible]
वानितिभिक्षुर्भगवन्तःप्रत्यश्रोषीत्॥भगवान्तानेतदुवाच॥द्वाविमौभिक्षवःप्रव्रजितस्यअन्तौकतमौद्वौयश्चायंकामेषुकामसुखल्लिकानुयोगोग्राम्यप्राथुज्जनको
नोलमार्योनार्थसंहितोनानातिव्रतस्यचर्यस्यतन्निर्विदायेननविरागायेननिरोधायेनश्रामण्यायेनसंबोधायेननिर्वाणायेसंवर्त्तन्ति॥यश्चायंआत्मकिलामथानुयोगोदुःखोअ
नार्योअनर्थसंहितोइमौभिक्षवोद्वौप्रव्रजितस्यअन्तौसत्तेवभिक्षवोउभौअन्तावनुपगम्यतथागतेनार्यस्मिंधर्मविनयेमध्यमाप्रतिपदाअनुसंबुद्धाचक्षुकरणीयाज्ञान
करणीयउपशमसंवर्त्ततिकानिर्विदायेविरागायेनिरोधायेश्रामण्यायेसंबोधायेनिर्वाणायेसंवर्त्तति॥कतमासाभिक्षवःतथागतेनार्यस्मिंधर्मविनयेमध्यमाप्रतिप
दाअभिसंबुद्धाचक्षुकरणीयाज्ञानकरणीउपशमसंवर्त्ततिकानिर्विदायेविरागायानिरोधायेश्रामण्यायेसंबोधायेनिर्वाणायसंवर्त्तति॥यमिदमार्याष्टाङ्गिकः॥सम्य
दंसम्यग्दृष्टिःसम्यक्संकल्पःसम्यग्व्यायामःसम्यक्कर्मान्तोसम्यगाजीवःसम्यग्वाक्सम्यक्स्मृतिःसम्यक्समाधिरियंसाभिक्षवःतथागतेनार्यस्मिंधर्मविनयेमध्यमा
प्रतिपदाअभिसंबुद्धाचक्षुकरणीयाज्ञानकरणीयाउपशमसंवर्त्ततिकानिर्विदायेविरागायेनिरोधायेश्रामण्यायेसंबोधायेनिर्वाणायेसंवर्त्तति॥चत्वारिखलुपुनरिमा
निभिक्षवोआर्यसत्यानिकतमानिचत्वारिसद्यथेदंदुःखमार्यसत्यंदुःखसमुदयोआर्यसत्यं॥दुःखनिरोधोआर्यसत्यंदुःखनिरोधगामिनीप्रतिपदार्यसत्यंतत्रभिक्षवः
कतमंदुःखंआर्यसत्यं॥तद्यथाजातिदुःखंजरादुःखंव्याधिदुःखंमरणंदुःखंअप्रियसंप्रयोगोदुःखंप्रियविप्रयोगोदुःखंयंपिच्छन्तोपर्येषन्तोनलभतितंपिदुःखंरूपंदु
खंवेदनादुःखासंस्कारादुःखाविज्ञानंदुःखंसंक्षिप्तेनपंचोपादानस्कंधादुःखाइदंभिक्षवोदुःखमार्यसत्यं॥तत्रकतमोदुःखसमुदयोआर्यसत्यंयोगंतृष्णापौनर्भविका

नन्दीरागसहगता ॥ तत्र तत्राभिनन्दिनी ॥ अयं भिक्षवो दुःखसमुदयो आर्यसत्यं ॥ तत्र कतमो दुःखनिरोधो आर्यसत्यो योस्तस्यैव तृस्नायेन नन्दीरागसहगताये तत्र तत्राभिनन्दिनीये अशेषक्षयो विरागो निरोधो त्यागो प्रहाणाच्च तिनिःसर्गो अयं भिक्षवो दुःखनिरोधो आर्यसत्यो तत्र कतमा दुःखनिरोधगामिनी प्रतिपदार्यसत्या ॥ एषैव आर्य्याष्टांगो मार्गो ॥ तद्यथा सम्यग्दृष्टिः संम्यक्संकल्पः सम्यग्वाचा सम्यक्कर्मान्तः सम्यगाजीवः सम्यग्व्यायाम सम्यक्स्मृतिः सम्यक्समाधिरियं भिक्षवः दुःखनिरोधगामिनी प्रतिपदार्यसत्यं ॥ इदं दुःखमिति भिक्षवः पूर्वे अननुश्रुतेहि धर्मेहि योनिशोमनसिकारात् ज्ञानं उदपासि चक्षुरुदपासि विद्या उदपासि बुद्धि उदपासि भूरिरुदपासि प्रज्ञा उदपासि आलोक प्रादुरभूषि ॥ अयं दुःखसमुदयो इति मे भिक्षवः पूर्वे अननुश्रुतेहि धर्मेहि योनिशोमनसिकाराज्ञानमुदपासि चक्षुरुदपासि विद्या उदपासि बुद्धिरुदपासि भूरिरुदपासि मेधा उदपासि प्रज्ञा उदपासि आलोको प्रादुरभूषि ॥ अयं दुःखनिरोधो इति मे भिक्षवो पूर्वे अननुश्रुतेहि धर्मेहि योनिशोमनसिकारात् ज्ञानमुदपासि चक्षुरुदपासि विद्या उदपासि बुद्धिरुदपासि भूरिरुदपासि मेधा उदपासि प्रज्ञा उदपासि आलोको प्रादुरभूषि ॥ इयं च दुःखनिरोधगामिनी प्रतिपदा इति मे भिक्षवो पूर्वे अननुश्रुतेहि धर्मेहि योनिशोमनसिकाराज्ञानं उदपासि यावदालोके प्रादुरभूषि ॥ स खलु पुनरयं दुःखसमुदयो आर्यसत्यो प्रहातव्य इति मे भिक्षवो पूर्वे अननुश्रुतेहि धर्मेहि योनिशोमनसिकारात ज्ञानमुदपासि यावदालोके प्रादुरभूषि ॥ तं खलु पुनरिदं दुःखमार्यसत्यं परिज्ञातमिति मे भिक्षवः पूर्वे अननुश्रुतेहि धर्मेहि योनिशोमनसिकाराज्ञानमुदपासि यावदालोके प्रादुरभूषि ॥ तं न खलु पुनरयं दुःखसमुदयो आर्यसत्यो प्रहीणो इति मे भिक्षवो पूर्वे अननुश्रुतेहि धर्मेहि योनिशोमनसिकाराज्ञानमुदपासि यावदालोके प्रादुरभूषि ॥ अथ खलु पुनरयं दुःखनिरोधो आर्यसत्यो साक्षीकृतो भिक्षवः पूर्वे अननुश्रुतेहि धर्मेयोनिशोमनसिकाराज्ञानमुदपासि ॥ यावदालोको प्रादुरभूषि ॥ सा खलु पुनरियं दुःनिरोधगामिनी प्रतिपदार्य्यसत्या भाविता इति मे भिक्षवो पूर्वे अननुश्रुतेहि धर्मेहि योनिशोमनसिकाराज्ञानमुदपासि ॥ यावदालोको प्रादुरभूषि ॥

थं॥लोकेअग्रन्तिवर्ण्णियंयोमेधर्मंअधिगतोविरागोपसमोशिवोतमहंप्रवर्तयिष्यामिहितायसर्वप्राणिनां॥येचाभ्यतीतासंबुद्धायेचबुद्धाअनागता॥येचेतरहिसंबुद्धाबहु
शोकनाशको॥धर्मंदेशेन्तिबुद्धानांबुद्धानामेषधर्मता॥देवतामन्तरीक्षेचगाथामभाषति॥यस्त्वंरूपेनरदम्यसारथिदृष्ट्वामहर्षिपरिवर्ज्जयेयं॥हस्तेहिचपादेहिचसोमहा
शरींग्रामयेरुषभतीवमाव्राउन्नधीलायांसुद्धनोनामयक्षोतेनभगवांस्वकेचभवनेवासेनचभक्तेनचनिमन्त्रितोभगवांसुन्दरस्ययक्षस्यभवनेएकरात्रोषितोकृतभक्तकृ
त्योसारथिपुरेभगवानन्तरेणारोहितवस्तुकंगच्छति॥रोहितवस्तुकेकमण्डलुकोनामनागराजोतेनभगवान्स्वकेभवनेवासेनचभक्तेनचनिमन्त्रितो॥तत्रापिभगवांएक
रात्रोषितोकृतभक्तकृत्योरोहितकातोगन्धपुरंगच्छति॥गन्धपुरेकन्धोनामयक्षोप्रतिवसतितेनभगवान्स्वकेचभवनेवासेनचभक्तेनचनिमन्त्रितो॥तत्रापिभगवानेकरात्रो
षितोकृतभक्तकृत्योसारथिपुरंगच्छति॥सारथिपुरेभगवानन्यतरेणगृहपतिनावासेनभक्तेनचनिमन्त्रितोतत्रापिभगवांएकरात्रोषितोकृतभक्तकृत्योसारथिपुरा
तोगंगातीरमनुप्राप्तो॥नाविकानानिआह॥देहितरपण्यं॥भगवानाह॥कुतोममसमलेष्टुकाञ्चनस्यव्यपगतजातरूपरजतस्यतरपण्यं॥नाविकोआह॥यदिवादेसितर
पण्यंतरीहसि॥अथवानददासिनतरीहसीति॥भगवानाह॥नाहंसोनननदीतीरेनाविकंपरिपृच्छति॥स्वकेनबाहुवीर्येणाहंसोतरतिनर्मदां॥इतिवदित्वानसंबुद्धोहंस
राजेवप्रक्रमे॥गंगातीरेअस्थासिओघत्तीर्णोमहामुनि॥भगवांदानिगंगाउत्तीर्णोवाराणसीमनुप्राप्तःसेरवतेधीयंअस्थासिभगवांकालंआगमेति॥वाराणस्यांपिराज्ञा
यचरितुंनापिविकालेहिविहरन्ति॥उष्काकालेपिराज्ञायचरन्ति॥यामेविकालचारीहिवसन्तिसंगात्तस्माद्विकालेनचरन्तिउष्का॥ऋषिपत्तनेपंचकाभद्रवर[illegible]विहरन्तिआ
ज्ञानकौण्डिन्याअश्वकीभद्रकोवाष्पोमहानामोभगवांवाराणसीतोपिराज्ञायचरित्वाकृतभक्तकृत्योऋषिपत्तनंगच्छतिपंचकेहिभद्रवर्गीयेहिभगवान्दूरतोस्वागच्छन्तं
दृष्ट्वाभगवन्तंक्रियाकालंकरोन्ति॥अयंश्रमणोगौतमोआगच्छतिशैथिलिकोबाहुलिकोप्रधानाविक्रान्तोनकेनचित्प्रत्युत्थातव्यो॥भगवांचागच्छतितेचस्वकेस्थानेपुन

रमन्ति ॥ सय्यथापि नाम सकुनो नीडगताधस्तात्क्षाशास्त्वगनाबहेष्ठतो अभिवासंतापियमाना उत्पघितेन्सुः ॥ एवमेव पंचका भद्रवर्गीया दूरतो एवागच्छन्तं स्वकस्वकेष्वा
सनेषु रतिं अविन्दन्तो भगवतो प्रत्युत्थापेन्सुः प्रत्युद्गमेन्सुः ॥ एहि आयुष्मां गौतम स्वागतं आयुष्मता गौतमस्यानुरागतः आयुष्मन्तो गौतमस्य ॥ भगवानाह ॥ मा यूयं भिक्षवो
भद्रवर्गीया अप्रतिज्ञाना भिक्षवो भद्रवर्गीया तथागतं आयुष्मद्वादेन समाचरथ ॥ तेषां दानि भगवता शिक्षावादेन भाषितानां यत्किंचित्तीर्थिकलिंगं तीर्थिकगुप्तिनीर्थिकध्व
ल्पं सर्वं समनन्तरहितं ॥ त्रिचीवरं च प्रादुर्भवेन्सुः उद्भकाश्च पात्राः प्रकृतिस्वभावसंस्थिता च केशा ईर्यापथाश्च तानि संस्थिता सय्यथापि नाम वर्षशतोपसंपन्नानां भिक्षुणां
एष आयुष्मन्तानां पंचानां भद्रवर्गीयानां प्रव्रज्योपसंपदानां भिक्षुभावो ॥ ते दानि पंचके तेन भगवन्तं निमन्त्रयेन्सुः ॥ वृक्षविस्तीर्णा नाम पुष्करिणी तहिं भगवां स्नातो जान
न्तो चङ्क्रमे भगवतो ॥ अथ खलु भगवतो एतदभूषि ॥ कतमस्मिं पृथिवीप्रदेशे पूरिमकाः सम्यक्संबुद्धा धर्मचक्रं प्रवर्तेन्सुः ॥ सहचित्तोत्पादेन भगवतो तं पृथिवीप्रदेशा
ओनमन्ति च उन्नमन्ति च ॥ अथ खलु भगवत एतदभूषि किं नु खलु पूरिमकाः सम्यक्संबुद्धाः गच्छन्तका धर्मचक्रं प्रवर्त्तेन्ति स्थितका वा निषण्णका वा शयनका वा सहचित्तो
त्पादेन भगवतो ऋषिपतने पंच आसनप्रादुर्भूतानि ॥ पंच भद्रवर्गीया भगवन्तं पृच्छन्ति किस्य इमानि भगवन् आसनानि ॥ भगवानाह ॥ पूर्विका नामायं भिक्षवो भद्रवर्गीया
च भद्रकल्पे बुद्धसहस्रेण उपधितव्यानि त्रीणि प्रतीतानि अहं चतुर्थो ॥ ककुत्सन्दो नवयोजनप्रभो कोनाकमुनिः द्वियोजनप्रभो काश्यपो मुनि चतुर्योजनप्रभो अहमसि
सिद्धार्थो व्यामप्रभो अजितो द्वादशयोजनप्रभो सिद्धार्थो विंशयोजनप्रभो मैत्रेयो द्वादशयोजनप्रभो मेत्रयशो अष्टादशयोजनप्रभो सर्वप्रिय दशयोजनप्रभो पृथिवीपा
लो द्वादशयोजनप्रभो पृथिवीविजयो चतुर्योजनप्रभो पृथिवीविपश्यी त्रियोजनप्रभो जयमित्रो चतुर्योजनप्रभो सुग्रीवो द्वादशयोजनप्रभो सुदर्शनो दशयोजनप्रभो
सुपश्वो दशयोजनप्रभो सर्वंजयो अष्टयोजनप्रभो सर्वाभिभू कोशयोजनप्रभो सर्वाभिभूतो अष्टयोजनप्रभो सर्वमित्रो द्वियोजनप्रभो अभिताभू द्वादशयोजनप्रभो

प्रक्रान्ता॥ तत्र च वयं भगवन्मार्गे यावच्च बोधिया वच्च वाराणसीं दिव्यानि छत्राणि अभिनिर्मिणोम्बा दिव्यानि ध्वजानि अभिनिर्मिणिष्यामः दिव्यानि कूटागाराणि अभि
निर्मिणिष्यामः॥ चित्राणि दर्शनीयानि सप्तानां रत्नानां सुवर्णस्य रूप्यस्य मुक्ताया वैडूर्यस्य स्फटिकस्य मुसारगल्वस्य लोहितिकाया भगवतो यच्छन्तस्य गमिष्यन्ति तिष्ठन्
स्यन्ति स्थन्ति॥ पुरतोच वर्षवलाहका देवपुत्रा दिव्यानि पुष्पाणि प्रकिरिष्यन्ति मन्दं मन्दं च देवा प्रसादयिष्यन्ति॥ भगवां बोधितो वाराणसीं ऋषिपतने मृगदावे प्र
स्थितो अनुत्तरं धर्मचक्रं प्रवर्तयितुं॥ शुद्धावासेहि देवपु[illegible]हि मार्गो प्रतिजागृतो महतीं चतुरङ्गिनीसेनामभिनिर्मिणित्वा महान्तं हस्तिकायं महान्तमश्वकायं रथ
कायं पत्तिकायं॥ भगवन्तं वाराणसीं गच्छन्तं पुरस्कृत्यस्थुः यावत्सुवर्णानामधिपतयो सुवर्णराजानो अण्डजा वा जरायुजा वा संस्वेदजा वा ओपपादुका वा ते महान्तं चतुरङ्गि
नीसेनांक्षीये अभिनिर्मिणित्वा भगवन्तं गच्छन्तं पुरस्कृत्यस्थुः यावन्नागानां अधिपतयो नागराजानो अण्डजा वा जरायुजा वा संस्वेदजा वा औपपादुका वा ते महतीं चतुर
ङ्गिनीसेनांक्षीये अभिनिर्मिणित्वा भगवन्तं वाराणसीं गच्छन्तं पुरस्कृत्यस्थुः वज्रमहाराजिका देवास्त्रयस्त्रिंशा यामा तुषिता निर्माणरता वशवर्तिपरनिर्मितब्रह्मकायि
का देवा महान्तं चतुरङ्गिनीसेनांक्षीये अभिनिर्मिणित्वा काशिं गच्छन्तं पुरस्कृत्यस्थुः अथ खलु भगवान्महतीये परिषाये अनेकशताये अनेकसहस्राये अनेकशत
सहस्राये पुरस्कृतो परिवारितो उरुविल्वातो गयां गच्छति गयातो अपरगयां गच्छति॥ अपरगयायां सुदर्शनो नाम नागराजा तेन भगवां अपरगयायां वासेन भक्ते ३३७
न च निमन्त्रितो तहिं भगवां सुदर्शनस्य नागराज्ञो भवने वसित्वा कृताहारो वशालां गच्छति वशालायां नदी नाम ब्राह्मणो कुहको तिष्ठति॥ सो भगवन्तं गच्छन्तं
अपसव्याकरोति च हुहुंति च करोति॥ भगवानेतस्मिं वस्तुस्मिं एतस्मिं निदाने एतस्मिं प्रकरणे तायेवेलाये इमं उदानं उदानये॥ यो ब्राह्मणो वाहितपापधर्मो निहु
कुहो निष्कषायो॥ यतात्मा क्षीणास्रवो अन्तिमदेहधारी धर्मेण सो ब्राह्मणो ब्रह्मवादं वदेय॥ वशालायामन्यतमो गृहपतिर्भगवन्तं वासेन च भक्तेन च निमन्त्रेति॥

तहिंभगवांउरुविल्वाकृतभक्तकृत्योवराणसीतोउरुवीरंनाममधिष्ठानंगच्छतिअद्राक्षीदुपकोआजीवकोभगवन्तंदूरतोयेवागच्छन्तंदृष्ट्वाचपुनर्येनभगवांस्तेनोपसंक्रमित्वाभगव
तासार्द्धिंसंमोदनीयांगाथांसंमोदयित्वासारायणीयांकथांव्यतिसारयित्वाएकान्तेअस्थादेकान्तस्थितःउपकोआजीवकोभगवन्तमेतदवोचत् ॥ परिशुद्धोभगवतोगौतमस्यछ
वीवर्णोपर्यवदातोविप्रसन्नंचमुखवर्णोसय्यथापिनाममृणालस्यपक्वस्यसंप्रतिवन्धनोन्मुक्तस्यवृन्ताशयोपरिशुद्धोभवतिपर्यवदातोसपीतनिर्भासोचएवमेवभगवतोगौत
मस्यछवीवर्णोपरिशुद्धोपर्यवदातोविप्रसन्नाचमुखवर्णोकच्चिभगवतोगौतमेनामृतंअधिगतंअमृतगामीवामार्गो ॥ एवमुक्तेभगवांउपकंआजीवकंएतदुवाच ॥ अ
मृतंमेउपकअधिगतंअमृतगामीचमार्गो ॥ एवमुक्तेउपकोआजीवकोभगवन्तमेतदुवाच ॥ कहिंवोभोगौतमोब्रह्मचर्यंउष्यति ॥ अथखलुभगवानुपकंआजीवकंगा
थायेअध्यभाषे ॥ सर्वाभिभूसर्वविदोहमस्मिसर्वेहिधर्मेहिअनोपलिप्तोसर्वंजहतृष्णाक्षयेविमुक्तोहंअभिज्ञायकमुद्दिशेय ॥ एवमुक्तेउपकोआजीवकोभगवन्तमे
तदुवाच ॥ अनाचार्योभवांगौतमोप्रज्ञानासि ॥ अथखलुभगवांउपकमाजीवकंगाथायेअध्यभाषे ॥ नमेआचार्योअस्तिचनवद्यतेएकोस्मिएवलोकसंबुद्धोलोकेप्राप्त
संबोधिरुत्तमा ॥ एवमुक्तेउपकोआजीवकोभगवन्तमेतदुवाच ॥ अर्हन्निति भगवांगौतमोप्रज्ञानासि ॥ अथखलुभगवांउपकंआजीवकंगाथायेअध्यभाषे ॥ अहंअर्हो
लोकेअहंलोकेअनुत्तरो ॥ सदेवकस्मिंलोकस्मिंसदृशोमेनविद्यते ॥ एवमुक्तेउपकोआजीवकोभगवन्तमेतदुवाच ॥ जिनोतिभगवांगौतमोप्रज्ञानासि ॥ अथखलुभग
वांउपकंआजीवकंगाथायेअध्यभाषे ॥ जिनोहिमादृशाभोन्तियेप्राप्ताआश्रवक्षयं ॥ जितामेपापकाधर्मातस्मादहमुपकजिनो ॥ पौण्डरीकंयथावारीअनोपलिप्यतेजि
न ॥ एवंलोकेनलिप्यामितस्मादहंउपकजिनो ॥ अभिज्ञोहंअभिज्ञातंवर्द्धनीयंचभावितं ॥ प्रहातव्यंप्रहीणंमेतस्मादहंउपकोजिनः ॥ एवनुपकोआजीवकोआजीवको
भगवन्तमेतदुवाच ॥ कहिंभगवांगौतमोगमिष्यसि ॥ अथखलुभगवांउपकंआजीवकंअध्यभाषे ॥ वाराणसिंगमिष्यामिआहरिष्यं ॥ अमृतदुन्दुभिंधर्मचक्रंप्रवर्त्तयि

कृतानामुपचितानामविपक्वानां विपाकप्रत्युपस्थितानां आयतिविपाकवैमात्रतां यथाभूतं सम्यक्प्रजानन्ति ते एवं धर्मचक्रं प्रवर्त्तेन्ति ॥ ये सर्वे
मापत्तीनांच संक्लेशव्यवदानं यथाभूतं संप्रजानन्ति ॥ ये दिव्येन चक्षुषा विशुद्धेनातिक्रान्तमानुष्यकेन सत्वां पश्यन्ति च्यवमानानुपपद्यमानां सुवर्णां दुर्वर्णा
प्रणीतां यथाकर्मोपगां सत्वां संप्रजानन्ति ॥ एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्त्तेन्ति ॥ ये अनेकविधं पूर्वनिवासं समनुस्मरन्ति ॥ ये चाश्रवाणां क्षयात् अनाश्र
ज्ञाविमुक्तिं च यथाभूतं संप्रजानन्ति ॥ ये चापि दीर्घायुष्का भवन्ति ॥ आजीवसंपन्ना भवन्ति शीलसंपन्ना भवन्ति समाधिसम्पन्नाः विमुक्तिसंपन्नाः विमुक्तिज्ञान
न्नाः नैष्क्रम्यसंपन्नाः महाकरुणाप्रतिलाभसम्पन्नाः बोधिसम्पन्नाः चेतःपर्य्यायसंपन्नाः ऋद्धिप्रातिहार्य्यसम्पन्नाः आदेशनाप्रातिहार्यसम्पन्नाः अनुशासनीप्रातिहा
र्यसम्पन्नाः सर्वकुशलधर्मसमन्वागताः येवार्थप्रतिसंविदप्राप्ता धर्मप्रतिसंविदप्राप्ता निरुक्तिप्रतिसंप्रतिसंविदप्राप्ताः प्रतिभानप्रतिसंविदप्राप्ताः ये चार्यपंचाङ्गिक
समाधिसमापन्नाः पंचज्ञानिकसमाधिसम्पन्नाः आर्य्यमहापंचाङ्गिकस्य सम्यक्समाधिसम्पन्नाः ये चाप्यार्य्यमहापंचज्ञानिकस्य सम्यक्समाधिप्राप्ताः बलसंपन्नाश्च ऋद्धि
यसम्पन्नाश्च ऋद्धिसम्पन्नाश्च ये वा पिपैतिये न वाचा ये समन्वागता विस्पष्टाये अनेलकवा ये अर्थस्य विज्ञापनीये समन्वागताः प्रश्नव्याकरणसम्पन्नाः ये प्रतिबलापरेषां
वैशारद्येऽपि द्वेषो विवर्जकं प्रतिबलापरेषां अहितैषीणां सहधर्मेण निग्रहीतुं ॥ ये प्रतिबलापरेषां सुखात् प्रशान्तं प्रशान्तुं एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्त्तेन्ति ॥ ये ते स
त्वाः सर्वज्ञधर्मैर्हि समन्वागता भवन्ति एवंरूपाः सत्वा आर्यधर्मचक्रं प्रवर्त्तेन्ति ॥ अहं खलु पुनः सर्वज्ञधर्मैर्हि समन्वागतो अरहाम्यहं धर्मचक्रं प्रवर्त्तयितुं ॥ अ
थ खलु भगवान् इमामेवरूपां आत्मनो गुणसमासानं विदित्वा एतदभूषि ॥ यं न्वहं आर्यमनुत्तरं धर्मचक्रं प्रवर्त्तयेयं ॥ को नु खलु मे प्रतिबलो प्रथमं धर्मं देशितं आजा
नितुं न च मे विहिंसयेय यमिदं धर्मं देशनाये ॥ अथ खलु भगवतो एतदभूषि ॥ उद्रको नाम रामपुत्रो शुद्धो अल्परजो अपरोक्षजातीयो सो चद्ररगतो अतिक्रान्त

गतोनैवसंज्ञानासंज्ञायतनसहव्रतायैधर्मंदेशयन्ति॥अपरेसमाहुःकालंगतोउद्रकोरामपुत्रोमहाराजीनोउद्ररामपुत्रोकतमोपिखल्वान्योपिसत्त्वोशुद्धोअल्परजोअप
रोक्षजातीयोमेप्रतिवलोप्रथमंधर्मंदेशितमाजानितुंनचमेविहेठयायमिदंधर्मंश्रवणाय।आराडोकालामोकतमोपुनरन्योपिसत्त्वोशुद्धोअल्परजस्कजातीयोमे
प्रतिवलोप्रथमंधर्मंदेशितमाज्ञानितुंनचमेविहेठयेयुरिदंधर्मंश्रवणाय॥अथखलुभगवतएतदभूषिपंचकाभद्रवर्गीयाशुद्धाअल्परजस्कजा॥तीयास्तेमेप्र
तिवलोप्रथमंधर्मंदेशितमाजानितुंनचमेविहेठयन्तुः॥यमिदंधर्मंश्रवणायपूर्वमेवदुष्करंचरन्तसअनुवध्नन्तुः॥तेचवाराणस्यांविहरन्तिऋषिपत्तनेमृगदावेयंनू
नाहंवाराणसींगत्वावाराणस्यांऋषिपत्तनेमृगदावेपंचानांभद्रवर्गीयानांप्रथमंधर्मंदेशयेयं॥अथखलुसंवहुलामहेशाख्याशुद्धावासकायिकादेवायेनभगवा
न्स्तेनोपसंक्रमित्वाभगवतःपादौशिरसावन्दित्वाएकान्तेअस्थासुःएकान्तस्थितास्तेभगवन्तमेतदुवाच॥एभगवतोनिकेवासिनोअभिज्ञाततपरिज्ञातुंप्रतिवलाः
स्थपुनर्वयंभगवतोविविधानिविचित्राणिऋद्धिप्रातिहार्याणिकर्तुंयेनभगवान्मार्गेणवोधितोवाराणसींगमिष्यतिऋषिपत्तनंमृगदावमनुत्तरंधर्मचक्रंप्रव
र्तयितुं॥ततोवयंभगवतोयावद्बोधियावद्वाराणसीमार्गंप्रतिजागरिष्यामःसमंअसमंविषमंपाणितलेजातंवितानवितानंचित्रपुष्पपरिक्षिप्तंओसक्तपट्ट
मकलापंसूक्ष्मसंसृष्टंधूपनधूपितंमुक्तपुष्पावकीर्णंसुवर्णवालिकासंस्तृतंदिव्यमुक्ताचूर्णसंस्तृतंदिव्यस्फटिकचूर्णसंस्तृतं॥दिव्यमुसारगल्वचूर्णसंस्तृतंदिव्यलो
हितिकचूर्णसंस्तृतं॥तत्रचवयंभगवन्मार्गेयावद्बोधियावद्वाराणसीयोदिव्यतालपंक्तियोअभिनिर्मिणिष्यामः॥चित्राणिदर्शनीयानिसप्तानांवर्णानांसुव
र्णस्यरूप्यस्यमुक्तायावैडूर्यस्यस्फटिकस्यमुसारगल्वस्यलोहितिकाया।॥तत्रचवयंभगवनयंमार्गंवामदक्षिणान्तोदिव्यायोनदीयोअभिनिर्मिणिष्यामः॥अच्छार
मासेकतासुखोपनीत्वासुवर्णवालुकासंस्तृताउत्पलपद्मकुमुदपुण्डरीकनलिनीसौगन्धिकआम्रजम्बूकदलीपनसनालिकेलपारेवतकाभव्यदाडिमस्पृक्षीक

र्विनेयाऽविशोधेया अज्ञाक्षन्त सत्त्वास्ताकारां ऽविनेयांऽविशोधेयां अज्ञासीत् सत्त्वाउघटितज्ञां विपंचितज्ञांनेयापदपरमांअज्ञाक्षीत्सत्त्वांतीक्ष्णेन्द्रियांमध्येन्द्रियांमृ

यांसत्त्वानांचयोराशियः सम्यक्त्वनियतोराशि मिथ्यात्वनियतोराशि अनियतोराशिं ॥ तत्यथापिनाम वरुणस्य पुरुषोपश्मिनीतीरे स्थित्वा अल्पकिशलेणपश्यत ॥ उत्प

लानिवापद्मानिवापुण्डरीकाणिवा ॥ अन्तानि अन्तोदकानि अन्त्यानि उदकान्तो अनुद्गतानि एवमेव भगवानत्तरेणाईछचक्षुषा सर्वावन्तंलोकमभिलोकयन्तो अ

ज्ञासीत् ॥ अथखलु भगवांस्तत्रऋषिरेशयेवाहंधर्मनवादेशे यं मिथ्यात्वनियतोराशि अभव्योरेषाधर्मदेशयितुं अजानितुं देशयेवाहंधर्मनवाहंसंमक्तु नियतो

राशिआज्ञात्तमेवरस्ता येयः खल्वहं अनियतोराशिससास्यधर्मं देशयिष्यअजानिष्यतिनाचदेशंपाजनिष्यति ॥ अथखलु भगवां अनियतंराशिमारभ्य मागधका

नांवज्ञाललराष्ट्रपतिकानांचरत्नेवंरूपाणिपापकान्यकुशलानि दृष्टिगतानिउत्पन्नानिविदित्वा महाब्राह्मणाचाभियाचनां विदित्वा सप्तासंख्येयकल्पसमुपनीतस

मुत्पन्नंयत्तःकरिणाभांतंविदित्वा सत्त्वेषुवमहाकरुणा ओकामेन्ता ॥ इमेवमेमहेशाख्योदेवाधिपतयो लोकेश्वराउपसंक्रान्त आर्य धर्मचक्रप्रवर्त्तनेयाचन्ति ॥ अथख

लुभगवां महाब्राह्मणो अवकाशमकार्षीत् ॥ आर्य्यधर्मचक्रप्रवर्त्तनायतायेदेलाय भगवान्महाब्राह्मणांगाथायेअभ्यभाषे ॥ अपावृतंमेअमृतस्य द्वारं ब्रह्मेति भगवां

ये श्रोतुकामाश्रद्धाप्रमुञ्चन्तु विहेठकसंज्ञानप्रकंविहेठकसंज्ञानपुरे अभाषिधर्मोअनुमागधेषपूर्वं ॥ अथखलुभगवतामहाब्राह्मणो अवकाशेकृते अनुत्तर

धर्मचक्रप्रवर्त्तनायभूम्यादेवाघोषमुदीरयेत्सुः ॥ एवंमारिषमहाब्राह्मणो भगवताचकाशेकृते अनुत्तरधर्मचक्रप्रवर्त्तनायनंभविष्यति ॥ बहुजनहितायबहुजनसुखा

यलोकानुकंपायमहतोजनकायस्यार्थायहितायसुखायदेवानांचमनुष्याणांचहायिष्यन्ति ॥ असुराःकायाःदिव्याकायाअभिवर्द्धयिष्यन्ति ॥ भूम्यांदेवानांघोषंश्रुत्वाच

तुर्म्महाराजकायिकादेवाः त्रयस्त्रिंशायामातुषितानिर्माणरतीपरनिर्मितवशवर्त्तीदेवाघोषमुदीरयेत्सुः शब्दमनुश्रावयेत्सुः एवंमारिषभगवतामहाब्राह्मणोअव

काशेऽसौ तो धर्मचक्रप्रवर्त्तनाय तं भविष्यति ॥ बहुजनहिताय सुखाय लोकानुकंपाय महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च हायिष्यति आसुराका
पादिव्याकायाः अभिवर्द्धिष्यन्ति ॥ इतिहि तेन कालेन तेन समयेन यावद्ब्रह्मलोकं घोषमभ्युद्गतोऽस्तमेत्थंक्षयति ॥ ॥ अथ खलु भगवाप्रवर्त्तनाय तस्मिन् समये केवलरू
पा सत्वा आर्यधर्मचक्रं प्रवर्त्तयंतीति ॥ येते सत्वा पूर्वयोगसमन्नाभवन्ति ॥ एवंरूपा सत्वा आर्यधर्मचक्रं प्रवर्त्तयन्तीति ॥ येच सत्वा पूर्वयोगसमन्नाभवन्ति ॥ ते आर्य
धर्मचक्रं प्रवर्त्तन्ति ॥ अहं खलु पूर्वयोगसंजनेतव्या ॥ अन्तर्हितास्माकं आर्यधर्मचक्रं प्रवर्त्तयितुं ॥ येते सत्वा अनुत्तराचारे सम्पन्नाभवन्ति एवंरूपा सत्वा आर्यधर्मचक्रं प्रव
